LIBRARY

LIBRARY

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 1st Semester Examination, 2019

## SANACOR01T-SANSKRIT (CC1)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्चप्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः  2×5 = 10

(क) 'रघुवंशम्' कीदृशं काव्यम् ? तस्मिन् काव्ये कियन्तः सर्गाः सन्ति ?

(ख) 'रघुवंशम्' इति महाकाव्यस्य प्रथमसर्गस्य नाम किमस्ति ?

(ग) रविः कथं पृथिवीरसं गृह्णाति ?

(घ) सूर्यवंशस्य प्रथमः राजा कः आसीत् ? इक्ष्वाकु कः आसीत् ?

(ङ) 'क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः' – सूर्यप्रभवः वंशः कः ? अल्पविषया मतिः कस्य ?

(च) 'स पिता पितरस्तासां केवलं जन्महेतवः' – अत्र कः कस्य पिता ?

(छ) रघुवंशमिति महाकाव्यस्य प्रसिद्धा टीका का ? को वा रचयिता ?

(ज) 'तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः' – इत्यत्र कस्य पवित्रस्य वंशस्य कथनम् अस्ति ? तस्मिन् वंशे कः जन्म प्राप्तवान् ?

### SECTION-B

2. यथाभिमतं प्रश्नस्य एकस्योत्तरं प्रदेयम् –  10×1 = 10

(क) कुमारसम्भवमिति महाकाव्यस्य पाठ्यांशमनुसृत्य महाकवेः कालिदासस्य कवित्त्वम् विचारयतु।

(ख) पार्वत्याः मातुर्नाम किम् ? कथं पार्वती तपस्यां कृतवती ? कथं सा पार्वतीं तपसः निवारयितुं चेष्टितवती – सोदाहरणं लिख्यताम्।  1+2+7=10

3. कस्यचिदेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्यां कुरुत –  5×1 = 5

(क) इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्॥

(ख) निशम्य चैनां तपसे कृतोद्यमां सुतां गिरिशप्रतिसक्तमानसाम्।
उवाच मेना परिरभ्य वक्षसा निवारयन्ती महतो मुनिव्रतात्॥

## SECTION-C

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं प्रदेयम् – 10×1 = 10

(क) कपटपाशाक्रीडया युधिष्ठिरात् प्राप्तं राज्यं स्वायत्तीकर्तुं दुर्योधनः यासां नीतिनां प्रयोगं कृतवान् ताः स्वभाषयावर्णयत।

(ख) 'नारिकेलफलसम्मितं वचो भारवेः' – इति किरातार्जुनीयाख्यस्य महाकाव्यस्य प्रथमसर्गान्तर्गतं पाठ्यांशमनुसृत्य सोदाहरणं विचारयत।

## SECTION-D

5. यथेच्छमेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्या क्रियताम् – 5×1 = 5

(क) स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते सः किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः॥

(ख) कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद्व्यथते नताननः सः दुः सहान्मन्त्रपदादिवोरगः॥

## SECTION-E

6. अधोगतेषु विषयद्वयमाश्रित्य संस्कृतेन देवनागरीलिप्या च टीका लिख्यताम्। 5×2 = 10

गीतगोविन्दम्, वैराग्यशतकम्, नैषधचरितम्, रघुवंशम्।

——×——